श्रीसायीश्वराय नमः। हरिः ॐ।

śrīsāyīśvarāya namaḥ | hariḥ om |

अथतः पंचंग रुद्राणां

athataḥ pañcaṅga rudrāṇāṁ

१ ॐकार मंत्र सम्युक्तम् नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं तस्मै ॐकाराय नमो नमः॥

1) omkāra mantra samyuktam nityaṁ dhyāyanti yoginaḥ |
kāmadaṁ mokṣadaṁ tasmai omkārāya namo namaḥ ||

नमस्ते देव देवेश नमस्ते परमेश्वर। नमस्ते वृषभारूढ नकाराय नमो नमः॥

namaste deva deveśa namaste parameśvara | namaste vṛṣabhārūḍha nakārāya namo namaḥ ||

ॐ नमो भगवते रुद्राय। ॐ भूर्भुवस्सुवः॥ ॐ नम्।

om namo bhagavate rudrāya | om bhūrbhuvassuvaḥ || om nam |

नमस्ते रुद्रमन्यव उतोत इषवे नमः। नमस्त् अस्तु धन्वने बहुभ्य मुतते नमः॥

namaste rudramanyava utota iṣave namaḥ | namast astu dhanvane bahubhya mutate namaḥ||

यात इषुश्शिव्तमाशिवं बभूव्ते धनुः। शिवा शरव्या तव तयानो रुद्र मृडय॥

yāta iṣuśśivtamāśivaṁ babhūvte dhanuḥ | śivā śaravyā tava tayāno rudra mṛḍaya ||

ॐ नमो भगवते रुद्राय। नम् ॐ। पूर्वांग रुद्राय नमः॥

om namo bhagavate rudrāya | nam om | pūrvāṅga rudrāya namaḥ || ***[EAST]***

२ महादेवं महात्मानं महापातक नाशनं। महापापहरं वंदे मकाराय नमो नमः॥

2) mahādevaṁ mahātmānaṁ mahāpātaka nāśanaṁ |
mahāpāpaharaṁ vande makārāya namo namaḥ ||

ॐ भूर्भुवस्सुवः॥ ॐ मं।

om bhūrbhuvassuvaḥ || om maṁ |

ॐ निधनपतये नमः। निधनपतान्तिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिंगाय नमः। हिरण्याय नमः। हिरण्यलिंगाय नमः। सुवर्णाय नमः। सुवर्णलिंगाय नमः। दिव्याय नमः। दिव्यलिंगाय नमः। भवाय नमः। भव्लिंगाय नमः। शर्वाय नमः। शर्वलिंगाय नमः।शिवाय नमः। शिवलिंगाय नमः। ज्ज्वलाय नमः। ज्वललिंगाय नमः। आत्माय नमः। आत्मलिंगाय नमः। परमाय नमः। परमलिंगाय नमः। एतत् सोमस्य सूर्यस्य सर्वलिंगग् स्थापयति पाणिमंत्रं पवित्रं॥

om nidhanapataye namaḥ | nidhanapatāntikāya namaḥ | ūrdhvāya namaḥ | ūrdhvaliṅgāya namaḥ | hiraṇyāya namaḥ | hiraṇyaliṅgāya namaḥ | suvarṇāya namaḥ | suvarṇaliṅgāya namaḥ | divyāya namaḥ | divyaliṅgāya namaḥ | bhavāya namaḥ | bhavliṅgāya namaḥ | śarvāya namaḥ | śarvaliṅgāya namaḥ |śivāya namaḥ | śivaliṅgāya namaḥ | jjvalāya namaḥ | jvalaliṅgāya namaḥ | ātmāya namaḥ | ātmaliṅgāya namaḥ | paramāya namaḥ | paramaliṅgāya namaḥ |etat somasya sūryasya sarvaliṅgag sthāpayati pāṇimantraṁ pavitraṁ ||

ॐ नमो भगवते रुद्राय। मं ॐ। दक्षिणांगरुद्राय नमः॥

om namo bhagavate rudrāya | mam om | dakṣiṇāṅgarudrāya namaḥ || ***[SOUTH]***

३ शिवं शांतं जगन्नाधं लोकानुग्रह कारणम्। शिवमेक परम् वंदे शिकाराय नमो नमः॥

3) śivaṁ śāntaṁ jagannādhaṁ lokānugraha kāraṇam |
śivameka param vande śikārāya namo namaḥ ||

ॐ भूर्भुवस्सुवः॥ ॐ शिं।

om bhūrbhuvassuvaḥ || om śiṁ |

अपैतु मृत्युरमृतं न्न आगन्। वैवस्वतो नोअभयं कृणोतु।
पर्णम् वनस्पते रिवाभि न श्शीयताग्ं। रयि स्सचतां न श्शचीपतिः॥

apaitu mṛtyuramṛtaṁ nna āgan | vaivasvato no(a)bhayaṁ kṛṇotu |
parṇam vanaspate rivābhi na śśīyatāgṁ | rayi ssacatāṁ na śśacīpatiḥ ||

ॐ नमो भगवते रुद्राय। शिं ॐ। पश्चिमांग रुद्राय नमः॥

om namo bhagavate rudrāya | śim om | paścimāṅga rudrāya namaḥ || ***[WEST]***

४ वाहनं वृषभो यस्य वासुकी कंठ भूषणम् । वामे शक्तिधरं वंदे वकाराय नमो नमः॥

4) vāhanaṁ vṛṣabho yasya vāsukī kaṇṭhabhūṣaṇam |
vāme śaktidharaṁ vande vakārāya namo namaḥ ||

ॐ भूर्भुवस्सुवः॥ ॐ वां।

om bhūrbhuvassuvaḥ || om vāṁ |

प्राणानां ग्रंधिरसि रुद्रो मा विशान्तकः। तेनान्नेनाप्यायस्व। नमो रुद्राय विष्णवे मृत्युर्मेपाहि॥

prāṇānāṁ grandhirasi rudro mā viśāntakaḥ | tenānnenāpyāyasva | namo rudrāya viṣṇave mṛtyurmepāhi ||

ॐ नमो भगवते रुद्राय। वां ॐ। उत्तरांग रुद्राय नमः॥

om namo bhagavate rudrāya | vām om | uttarāṅga rudrāya namaḥ || ***[NORTH]***

५ यत्र कुत्र स्थितं देवं सर्वव्यापिन मीश्वरं। यल्लिंगं पूजये न्नित्यं यकाराय नमो नमः॥

5) yatra kutra sthitaṁ devaṁ sarvavyāpina mīśvaraṁ |
yalliṅgaṁ pūjaye nnityaṁ yakārāya namo namaḥ ||

ॐ भूर्भुवस्सुवः॥ ॐ यं।

om bhūrbhuvassuvaḥ || om yaṁ |

यो रुद्रो अग्नो यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु॥

yo rudro agno yo apsu ya oṣadhīṣu yo rudro viśvā bhuvanā viveśa tasmai rudrāya namo astu

ॐ नमो भगवते रुद्राय। यं ॐ। ऊर्ध्वांग रुद्राय नमः॥

om namo bhagavate rudrāya | yam om | ūrdhvāṅga rudrāya namaḥ || ***[UPWARDS]***

## अथ पंचमुख ध्यानं

atha pañcamukha dhyānaṁ

१ ॐ नम्॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥

1) om nam || tatpuruṣāya vidmahe mahādevāya dhīmahi | tanno rudraḥ pracodayāt ||

सम्वर्ताग्नि तटित् प्रदीप्त कनक प्रस्पर्धि तेजोमयं। गम्भीर ध्वनि सामवेद जनकं ताम्राधरं सुंदरं॥

अर्धेन्दु द्युति लोलपिंगळ जटा-भार प्रबध्धोरगं। वन्दे सिध्ध सुरासुरेंद्र नमितम् पूर्वं मुखं शूलिनः॥

samvartāgni taṭit pradīpta kanaka praspardhi tejomayaṁ |
gambhīra dhvani sāmaveda janakaṁ tāmrādharaṁ sundaraṁ ||
ardhendu dyuti lolapiṅgaḷa jaṭā-bhāra prabadhdhoragaṁ |
vande sidhdha surāsurendra namitam pūrvaṁ mukhaṁ śūlinaḥ ||

ॐ नमो भगवते रुद्राय। नं ॐ। पूर्वमुखाय नमः॥

om namo bhagavate rudrāya | nam om | pūrvamukhāya namaḥ || ***[EAST]***

२ ॐ मम्। अघोरेभ्यो अथघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥

2) om mam | aghorebhyo (a)thaghorebhyo ghoraghoratarebhyaḥ |
sarvebhya-ssarva śarvebhyo namaste astu rudrarūpebhyaḥ ||

कालाभ्र भ्रमरांजन द्युतिनिभं व्यावृत्त पिंगेक्षणं। कर्णोद्भासित भोगिमस्तक मणि प्रोद्गीर्ण दंष्ट्रांकुरं॥

सर्पप्रोत कपाल शुक्ति शकल व्याकीर्ण सच्छेखरं। वंदे दक्षिणमीश्वरस्य कुटिल भ्रूभंग रोद्रं मुखं॥

kālābhra bhramarāñjana dyutinibhaṁ vyāvṛtta piṅgekṣaṇaṁ |
karṇodbhāsita bhogimastaka maṇi prodgīrṇa daṁṣṭrāṅkuraṁ ||
sarpaprota kapāla śukti śakala vyākīrṇa sachchekharaṁ |

vande dakṣiṇamīśvarasya kuṭila bhrūbhaṅga roudraṁ mukhaṁ ||

ॐ नमो भगवते रुद्राय । मं ॐ । दक्षिणमुखाय नमः ॥

om namo bhagavate rudrāya | mam om | dakṣiṇamukhāya namaḥ || ***[SOUTH]***

३ ॐ शिं । सद्योजातं प्रपद्यामि सद्योजातायवै नमो नमः । भवेभवेनाति भवे भवस्वमां । भवोद्भवाय नमः ॥

3) om śiṁ | sa̱dyojā̱taṁ prapadyā̱mi̱ sa̱dyojā̱tāya̱vai namo̱ namaḥ |
bha̱vebhave̱nāti bhave bhavasva̱māṁ | bha̱vodbhavāya̱ namaḥ ||

प्रालेयाचल मिंदु कुंद धवळ गोक्षीरफेनप्रभं । भस्माब्यक्त मनंग देहदहन ज्वालावळीलोचनं ॥

ब्रह्मेन्द्रादि मरुद्गणै स्स्तुति पदैर् अभ्यर्चितम् योगिभिः । वंदेहं सकलं कळंकरहितं स्थाणोर्मुखं पश्चिमं ॥

prāleyācala mindu kunda dhava̱la gokṣīraphenaprabhaṁ |
bhasmābyakta manaṅga dehadahana jvālāva̱līlocanaṁ ||
brahmendrādi marudgaṇai sstuti padair abhyarcitam yogibhiḥ |
vandehaṁ sakalaṁ ka̱laṅkarahitaṁ sthāṇormukhaṁ paścimaṁ ||

ॐ नमो भगवते रुद्राय । शिं ॐ । पश्चिममुखाय नमः ॥

om namo bhagavate rudrāya | śim om | paścimamukhāya namaḥ || ***[WEST]***

४ ॐ वां । वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

4) om vāṁ | vā̱ma̱de̱vāya̱ namo jye̱ṣṭhāya̱ namaḥ śre̱ṣṭhāya̱ namo ru̱drāya̱ nama̱ḥ kālāya̱
nama̱ḥ kalavikaraṇāya̱ namo̱ balavikaraṇāya̱ namo̱ balāya̱ namo̱ balapramathanāya̱ nama̱ḥ
sarvabhūtadamanāya̱ namo ma̱nonmanāya̱ namaḥ ||

गौरं कुंकिम पंकिलं सुतिलकं व्यापांडु गंडस्थलं । भ्रूविक्षेप कटाक्ष वीक्षण लसत् सम्सक्त कर्णोत्फलं ॥

स्निग्धं बिंब फलाधरं प्रहसितं नीलालकालंकृतं । वंदेहं शशांकमंडल निभं वक्त्रम् हर स्योत्तरं ॥

gauraṁ kuṅkima paṅkilaṁ sutilakaṁ vyāpāṇḍu gaṇḍasthalaṁ |
bhrūvikṣepa kaṭākṣa vīkṣaṇa lasat samsakta karṇotphalaṁ ||
snigdhaṁ bimba phalādharaṁ prahasitaṁ nīlālakālaṅkṛtaṁ |
vandehaṁ śaśāṅkamaṇḍala nibhaṁ vaktram hara syottaraṁ ||

ॐ नमो भगवते रुद्राय । वां ॐ । उत्तरमुखाय नमः ॥

om namo bhagavate rudrāya | vām om | uttaramukhāya namaḥ || ***[NORTH]***

५ ॐ यं । ईशानः-सर्व-विद्याना-मीश्वर-स्सर्व-भूतानां ब्रह्मा-धिपति-र्ब्रह्मणो-धिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवों ॥

5) om yaṁ । īśānaḥ-sarva-vidyānā-mīśvara-ssarva-bhūtānāṁ brahmā-dhipati-rbrahmaṇo-dhipati-rbrahmā śivo me astu sadāśivoṁ ।।

व्यक्ताव्यक्त गुणेतरं परतरं षत्रिंश तत्त्वात्मकं । तस्मा दुत्तम तत्त्वमक्षर मिदं ध्येयं सदा योगिभिः ॥

ओम्कारादि समस्त मंत्र जनकं सूक्ष्मादि सूक्ष्मं परं । शाम्तं पंचम मीश्वरस्य वदनं खम्व्यापि तेजोमयं ॥

vyaktāvyakta guṇetaraṁ parataraṁ ṣatriṁśa tattvātmakaṁ ।
tasmā duttama tattvamakṣara midaṁ dhyeyaṁ sadā yogibhiḥ ।।
omkārādi samasta mantra janakaṁ sūkṣmādi sūkṣmaṁ paraṁ ।
śāmtaṁ pañcama mīśvarasya vadanaṁ khamvyāpi tejomayaṁ ।।

ॐ नमो भगवते रुद्राय । यं ॐ । ऊर्ध्वमुखाय नमः ॥

om namo bhagavate rudrāya । yam om । ūrdhvamukhāya namaḥ ।। ***[UPWARDS]***

***[Namaskaram to all the directions, while chanting the following mantra, starting from East, South, West, North, Northeast, Southeast, Southwest, Northwest, Upwards, and Downwards]***

पूर्वे पशुपतिः पातु दक्षिने पातु शंकरः । पश्चिमे पातु विश्वेशो नीलकंथ स्तथोत्तरे ॥

pūrve paśupatiḥ pātu dakṣine pātu śaṅkaraḥ ।
paścime pātu viśveśo nīlakantha stathottare ।।

ईशान्यां पातु मे शर्वो ह्याग्नेय्यां पार्वतीपतिः । नैर्ऋत्यां पातु मे रुद्रो वायव्यां नीललोहितः ॥

īśānyāṁ pātu me śarvo hyāgneyyāṁ pārvatīpatiḥ ।
nairṛtyāṁ pātu me rudro vāyavyāṁ nīlalohitaḥ ।।

ऊर्ध्वे त्रिलोचनः पातु अथरायां महेश्वरः । एताभ्यो दशदिग्भ्यस्तु सर्वतः पातु शंकरः ॥

ūrdhve trilocanaḥ pātu atharāyāṁ maheśvaraḥ ।
etābhyo daśadigbhyastu sarvataḥ pātu śaṅkaraḥ ।।

ना रुद्रो रुद्र मर्चयेत् ॥

nā rudro rudra marcayet ।।